# क्त्वाद्यर्थनिर्णयः

**Dr. G. S.V. Dattatreya Murthy**
Assistant Professor
Department of Sanskrit & IC
SCSVMV (Deemed to be university)
Enathur, Kanchipuram - 631561

**समानकर्तृकयोः पूर्वकाले** इति सूत्रेण विहितः क्त्वाप्रत्ययः **अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति** परिभाषया प्रकृत्यर्थे भावे एव प्रवर्तते। अतश्च **अव्ययकृतो भावे** इति सिद्धान्तसङ्गतिः। भुक्त्वा व्रजति इत्यादौ समानकर्तृकत्वम्, पूर्वकालिकत्वमुत्तर-कालत्वमित्यादि शाब्दबोधे भासते।

**अत्र मीमांसकमतम्**

भुक्त्वा व्रजती त्यादौ समानकर्तृता पूर्वकालता च प्रतीयते इति देवताधिकरणे, संज्ञामूर्त्यधिकरणे च स्थितं शाङ्करभाष्ये भामत्यादि वचनमनुसृत्य समानकर्तृकत्वं, पूर्वकालिकत्वं च क्त्वावाच्यमित्यभ्युपगच्छन्ति। तथा च समानकर्तृत्वं पूर्वकालिकत्वं च क्त्वार्थ इति तेषामाशयः।

**प्रभाकरमतम्**

पूर्वकालत्वस्य आक्षेपादेव लाभात् न तत् क्त्वावाच्यम्। भोजनकर्त्रैरेकत्वे अवगते हि अर्थादेकस्य पूर्वकालत्वाभावात्, समानकर्तृत्वमेव क्त्वावाच्यम्, तस्यैव नियमेन प्रतीतेः इति।

**नैयायिकमतम्**

समानकर्तृत्वस्य कृतिवाचकाभ्यां कृत्तिङ्भ्यां सामानाधिकरण्येनैव संसर्गेण द्वयोः क्रिययोः बोधनेनैव लाभ इति न तत् क्त्वा वाच्यम्। पूर्वोक्तभामतीग्रन्थे प्रतीतिरेवोक्ता। सा च प्रतीतिः द्वयोरपि क्रिययोः सामानाधिकरण्यसंबन्धेन बोधनेनैव सिध्यति। ज्योतिर्दर्शनात् इत्यत्र क्त्वाप्रत्ययस्य पूर्वकालिकत्वमेवार्थ भामतीकृद्भिरुक्तः। एवं च पूर्वकालिकत्वं क्त्वार्थः इति ज्ञायते। तथापि न तावत् तन्मात्रं क्त्वार्थः। वर्षान्तरीयं भोजनमादाय भुक्त्वा व्रजतीति प्रयोगापत्तेः। अतः अव्यवहितत्वमपि क्त्वावाच्यम् इति।

**मणिकारमतम्**

पूर्वकालिकत्वं न क्त्वावाच्यम्। तथा सति पूर्वक्रियाविशेष्यक एव बोधः स्यात्। न तु उत्तरक्रियाविशेष्यकबोधः। तथा अनुभवविरोधः। यद्यपि पूर्वकालत्वस्य वाच्यत्वोपगमेपि भुक्त्वा व्रजती त्यादौ तस्य निरूपकतासंबन्धेन उत्तरक्रियायामन्वयोपगमेन अनुभवसिद्धः उत्तरक्रियाविशेष्यको बोधः भवत्येव, तथापि न भुक्त्वा व्रजती त्यत्र निरूपकत्वस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताप्रसिद्धेः तादृशप्रतियोगिताकाभावबोधनम् अशक्यम्। अतः आनन्तर्यमपि क्त्वावाच्यम् इति।

**प्राचीनवैयाकरणमतम्**

क्त्वाप्रत्ययः असत्वभूतार्थकः। स च तिङन्तबोध्यक्रियान्तरे विशेषणम्। धातुसंबन्धाधिकारात्। तयोश्च क्रिययोः सम्बन्धः समानकर्तृत्वं, पूर्वकालत्वमुत्तरकालत्वं च। समानकर्तृकयोः पूर्वकाले इति सूत्रे समानकर्तृकयोः इति निर्धारणे षष्ठी सप्तमी वा। पूर्वकाले इति पूर्वः कालो यस्येति बहुव्रीहिः। एवं च समानकर्तृकयोः क्रियारूपयोरर्थयोः मध्ये पूर्वकालसम्बन्ध्यर्थवाचकात् धातोः क्त्वा भवतीत्यर्थः। एवं च भुक्त्वा व्रजती त्यादौ वाक्यशक्त्या यः सम्बन्धः प्रतीयते सामानाधिकरण्यमुत्तरकालिकत्वं च, तत्र सम्बन्धे तात्पर्यग्राहकाः क्त्वादयः। क्रिययोः विशेषणविशेष्यनियामकसम्बन्धश्च सामानाधिकरण्यम्, जन्यत्वम्, पूर्वोत्तरभावः, व्याप्यत्वं चेति बहुविधः। भुक्त्वा तृप्तः इत्यादौ भोजनजन्या तृप्तिरिति जन्यत्वं सम्बन्धः। भुक्त्वा व्रजती त्यादौ पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी च व्रजनमिति बोधः।

**अप्पय्यदीक्षितमतम्**

भामतीकल्पतरुव्याख्यायां परिमले द्वितीयाध्याय चतुर्थपादे क्त्वार्थविषये अप्पय्यदीक्षिताः एवमलिखन्। समानकर्तृकयोः पूर्वकाले इति स्मरणात् क्त्वार्थः कर्ता। अन्यथा इष्टकाः पक्त्वा अहं भोक्ष्ये इत्यत्र भोजनकर्तुरभिधानेपि पाककर्तुरनभिधानात् अनभिहिते कर्तरि तृतीया भवतीति पर्युदासाश्रयणात् मया इति तृतीयाप्रसङ्गः। अत एव प्रासादे आस्ते इत्यत्र सप्तम्युपपद्यते। प्रसादनक्रियाधिकरणस्योक्तत्वेपि व्याप्तिक्रियाधिकरणस्यानभिधानात्। अतः कर्तरि कृत् इति परिभाषणात् कर्ता क्त्वार्थ इति।

**शाब्दिकमतम्**

समानकर्तृकयोः पूर्वकाले इत्यत्र पूर्वकालशब्दः न बहुव्रीहिः। किन्तु कर्मधारय एव। एवं च समानकर्तृकयोः अर्थयोः मध्ये पूर्वकालविशिष्टार्थवृत्तेः धातोः क्त्वा भवतीति सूत्रार्थः। तथा च क्त्वाद्योत्ययोः पूर्वकालः क्त्वाप्रकृत्यर्थे प्रकारः। तद्बलात् तस्य आनन्तर्यसम्बन्धेन धात्वन्तरार्थे अन्वयः। समानकर्तृकयोः इति द्विवचनेन भुक्त्वा स्नात्वा पीत्वा व्रजतीत्यादौ अनेकक्त्वान्तानामपि साक्षात् तिङन्तेनैवान्वयः। प्रत्येकस्य क्त्वान्तबोध्यस्य व्यापारस्य तिङन्तबोध्यव्यापारं प्रत्येव च पूर्वकालित्वमिति आकरे स्पष्टम्।

**********************